This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित संग्रह

दाखल.क्र. M-617 विषय साहित्य

नाव महाभारत (पुर्वार्ध)

लेखक/लिपीकार

पृष्ठ 01 काल शके 1785 पुर्ण/ अपुर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुराचैवापराधेनवधेनचचमूपतेः ॥ मन्येमनःप्रजज्वालपांडवानांमहात्मनाम् ॥ २० ॥ तेषांक्रोधंचिंतयंस्तुअहःसुचनिशासुच ॥ नशांतिमधिगच्छामिदुर्योधन
कृतेनहि ॥ कथंचाभून्महायुद्धंसर्वमाचक्ष्वसंजय ॥ २१ ॥ ॥ संजयउवाच ॥ ॥ शृणुराजन्स्थिरोभूत्वातवापनयनोमहान् ॥ नचदुर्योधनेदोषमिममाधातुमर्ह
सि ॥ २२ ॥ गतोदकेसेतुबंधोयादृक्तादृङ्मतिस्तव ॥ संदीप्तेभवनेयद्वत्कूपस्यखननंतथा ॥ २३ ॥ गतपूर्वाह्णभूयिष्ठेतस्मिन्नहनिदारुणे ॥ तावकानांपरेषांचपु
नर्युद्धमवर्तत ॥ २४ ॥ श्वेतंतुनिहतंदृष्ट्वाविराटस्यचमूपतिम् ॥ कृतवर्मणाचसहितंदृष्ट्वाशल्यमवस्थितम् ॥ २५ ॥ शंखःक्रोधात्प्रजज्वालहविषाहव्यवाडिव ॥
सविस्फार्यमहच्चापंशक्रचापोपमंबली ॥ २६ ॥ अभ्यधावज्जिघांसन्वैशल्यंमद्राधिपंयुधि ॥ महतारथसंघेनसमंतात्परिरक्षितः ॥ २७ ॥ सृजन्बाणमयंवर्षंप्रा
याच्छल्यरथंप्रति ॥ तमापतंतंसंप्रेक्ष्यमत्तवारणविक्रमम् ॥ २८ ॥ तावकानांरथाःसप्तसमंतात्पर्यवारयन् ॥ मद्रराजंपरीप्संतोमृत्योर्दंष्ट्रांतरंगतम् ॥ २९ ॥ बृहद्ब
लश्चकौसल्योजयत्सेनश्चमागधः ॥ तथारुक्मरथोराजनपुत्रःशल्यस्यमानितः ॥ ३० ॥ विंदानुविंदावावंत्यौकांबोजश्चसुदक्षिणः ॥ बृहत्क्षत्रस्यदायादःसैंधव
श्चजयद्रथः ॥ ३१ ॥ नानाधातुविचित्राणिकार्मुकाणिमहात्मनाम् ॥ विस्फारितान्यदृश्यंततोयदेष्विवविद्युतः ॥ ३२ ॥ तेतुबाणमयंवर्षंशंखमूर्ध्न्यपातयन् ॥
निदाघांतेनिलोद्धूतामेघाइवनगेजलम् ॥ ३३ ॥ ततःक्रुद्धोमहेष्वासःसप्तभल्लैःसुतेजनैः ॥ धनूंषितेषामाच्छिद्यननर्दपृतनापतिः ॥ ३४ ॥ ततोभीष्मोमहाबाहुर्वि
नद्यजलदोयथा ॥ तालमात्रंधनुर्गृह्यशंखमभ्यद्रवद्रणे ॥ ३५ ॥ तमुद्यंतमुदीक्ष्याथमहेष्वासंमहाबलम् ॥ संत्रस्तापांडवीसेनावातवेगहतेवनौः ॥ ३६ ॥ ततोर्जु
नःसंत्वरितःशंखस्यासीत्पुरःसरः ॥ भीष्माद्रक्ष्योयमद्येतिततोयुद्धमवर्तत ॥ ३७ ॥ हाहाकारोमहानासीद्योधानांयुधियुध्यताम् ॥ तेजस्तेजसिसंपृक्तमित्येवंवि
स्मयंययुः ॥ ३८ ॥ अथशल्योगदापाणिरवतीर्यमहारथात् ॥ शंखस्यचतुरोवाहानहनद्भरतर्षभ ॥ ३९ ॥ सहताश्वाद्रथात्तूर्णंखड्गमादायविद्रुतः ॥ बीभत्सोश्चरथं
प्राप्यपुनःशांतिमविंदत ॥ ४० ॥ ततोभीष्मरथात्तूर्णमुत्पतंतिपतत्रिणः ॥ यैरंतरिक्षंभूमिश्चसर्वतःसमवस्तृता ॥ ४१ ॥ पंचालानथमत्स्यांश्चकेकयांश्चप्रभद्रकान्
भीष्मःप्रहरतांश्रेष्ठःपातयामासपत्रिभिः ॥ ४२ ॥ उत्सृज्यसमरेराजन्पांडवंसव्यसाचिनम् ॥ अभ्यद्रवतपांचाल्यंद्रुपदंसेनयावृतम् ॥ ४३ ॥ प्रियंसंबंधिनंराजन्
शरानवकिरन्बहून् ॥ अग्निनेवप्रदग्धानिवनानिशिशिरात्यये ॥ ४४ ॥ शरदग्धान्यदृश्यंतसैन्यानिद्रुपदस्यह ॥ अत्यतिष्ठद्रणेभीष्मोविधूमइवपावकः ॥ ४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ एकायनीकुर्वन्एकमार्गाः कुर्वन् ॥ ५१ ॥ ५२ ॥ ५३ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेएकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥

मध्यंदिनेयथादित्यंतपंतमिवतेजसा ॥ नशेकुःपांडवेयस्ययोधाभीष्मंनिरीक्षितुम् ॥ ४६ ॥ वीक्षांचक्रुःसमंतात्तेपांडवाभयपीडिताः ॥ त्रातारंनाध्यगच्छं
तगावःशीतार्दिताइव ॥ ४७ ॥ सातुयौधिष्ठिरीसेनागांगेयशरपीडिता ॥ सिंहेनेवविनिर्भिन्नाशुक्लागौरिवगोपतेः ॥ ४८ ॥ हतेविप्रद्रुतेसैन्येनिरुत्साहेविमर्दि
ते ॥ हाहाकारोमहानासीत्पांडुसैन्येषुभारत ॥ ४९ ॥ ततोभीष्मःशांतनवोनित्यंमंडलकार्मुकः ॥ मुमोचबाणान्दीप्ताग्रानहीनाशीविषानिव ॥ ५० ॥ शरैरेका
यनीकुर्वन्दिशःसर्वायतव्रतः ॥ जघानपांडवरथानादिश्यादिश्यभारत ॥ ५१ ॥ ततःसैन्येषुभग्नेषुमथितेषुचसर्वशः ॥ प्राप्तेचास्तंदिनकरेनप्राज्ञायतकिंचन
॥ ५२ ॥ भीष्मंचसमुदीर्यंतंदृष्ट्वापार्थामहाहवे ॥ अवहारमकुर्वंतसैन्यानांभरतर्षभ ॥ ५३ ॥ ॥ इतिश्रीम० भी० भीष्मव० शंखयुद्धेप्रथमदिवसावहारेएकोनपं
चाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥ ॥ संजयउवाच ॥ ॥ कृतेऽवहारेसैन्यानांप्रथमेभरतर्षभ ॥ भीष्मेचयुद्धसंरब्धेहृष्टेदुर्योधनेतथा ॥ १ ॥ धर्मराजस्ततस्तू
र्णमभिगम्यजनार्दनम् ॥ भ्रातृभिःसहितःसर्वैःसर्वैश्चैवजनेश्वरैः ॥ २ ॥ शुचापरमयायुक्तश्चिंतयानःपराजयम् ॥ वार्ष्णेयमब्रवीद्राजन्दृष्ट्वाभीष्मस्यविक्रमम्
॥ ३ ॥ कृष्णपश्यमहेष्वासंभीष्मंभीमपराक्रमम् ॥ शरैर्दहंतंसैन्यंमेग्रीष्मेकक्षमिवानलम् ॥ ४ ॥ कथमेनंमहात्मानंशक्ष्यामःप्रतिवीक्षितुम् ॥ लेलिह्यमानंसैन्यं
मेहविष्मंतमिवानलम् ॥ ५ ॥ एतंहिपुरुषव्याघ्रंधनुष्मंतंमहाबलम् ॥ दृष्ट्वाविप्रद्रुतंसैन्यंसमरेमार्गणाहतम् ॥ ६ ॥ शक्योजेतुंयमःक्रुद्धोवज्रपाणिश्चसंयुगे ॥ वरुणः
पाशभृच्चापिकुबेरोवागदाधरः ॥ ७ ॥ नतुभीष्मोमहातेजाःशक्योजेतुंमहाबलः ॥ सोहमेवंगतेमग्नोभीष्मागाधजलेऽप्लवे ॥ ८ ॥ आत्मनोबुद्धिदौर्बल्याद्भीष्ममा
साद्यकेशव ॥ वनंयास्यामिवार्ष्णेयश्रेयोमेतत्रजीवितुम् ॥ ९ ॥ नत्वेतान्पृथिवीपालान्दातुंभीष्मायमृत्यवे ॥ क्षपयिष्यतिसेनांमेकृष्णभीष्मोमहास्त्रवित् ॥ १०
यथाऽनलंप्रज्वलितंपतंगाःसमभिद्रुताः ॥ विनाशायोपगच्छंतितथामेसैनिकोजनः ॥ ११ ॥ क्षयंनीतोस्मिवार्ष्णेयराज्यहेतोःपराक्रमी ॥ भ्रातरश्चैवमेवीराः
कर्शिताःशरपीडिताः ॥ १२ ॥ मत्कृतेभ्रातृहार्देनराज्याद्भ्रष्टास्तथासुखात् ॥ जीवितंबहुमन्येहंजीवितंह्यद्यदुर्लभम् ॥ १३ ॥ जीवितस्यचशेषेणतपस्तप्स्यामिदु
श्चरम् ॥ नघातयिष्यामिरणेमित्राणीमानिकेशव ॥ १४ ॥ रथान्मेबहुसाहस्रान्दिव्यैरस्त्रैर्महाबलः ॥ घातयत्यनिशंभीष्मःप्रवराणांप्रहारिणाम् ॥ १५ ॥

कृतेवहारेइति ॥ १ ॥ २ ॥ ३ ॥ कक्षंतृणं ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ अप्लवेउडुपशून्ये ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १६ ॥ १७ ॥ १८ ॥ आर्जवेनअकुटिलेनदिव्यास्त्रमायाहीनेन ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ अंतर्मनाःविमनाः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ निधनंनिधनहेतुः ॥ ३० ॥

किंनुकृत्वाहितंमेस्याद्ब्रूहिमाधवमाचिरम् ॥ मध्यस्थमिवपश्यामिसमरेसव्यसाचिनम् ॥ १६ ॥ एकोभीमःपरंशक्त्यायुध्यत्येवमहाभुजः ॥ केवलंबाहुवीर्येणक्षत्रधर्ममनुस्मरन् ॥ १७ ॥ गदयावीरघातिन्यायथोत्साहंमहामनाः ॥ करोत्यसुकरंकर्मरथाश्वनरदंतिषु ॥ १८ ॥ नालमेषक्षयंकर्तुंपरसैन्यस्यमारिष ॥ आर्जवेनैवयुद्धेनवीरवर्षशतैरपि ॥ १९ ॥ एकोऽस्त्रवित्सखातेऽयंसोप्यस्मान्समुपेक्षते ॥ निर्दह्यमानान्भीष्मेणद्रोणेनचमहात्मना ॥ २० ॥ दिव्यान्यस्त्राणिभीष्मस्यद्रोणस्यचमहात्मनः ॥ धक्ष्यंतिक्षत्रियान्सर्वान्प्रयुक्तानिपुनःपुनः ॥ २१ ॥ कृष्णभीष्मःसुसंरब्धःसहितःसर्वपार्थिवैः ॥ क्षपयिष्यतिनोनूनंयादृशोऽस्यपराक्रमः ॥ २२ ॥ सत्वंपश्यमहाभागयोगेश्वरमहारथम् ॥ भीष्मंयःशमयेत्संख्येदावाग्निंजलदोयथा ॥ २३ ॥ तवप्रसादाद्गोविंदपांडवानिहतद्विषः ॥ स्वराज्यमनुसंप्राप्तामोदिष्यंतेसबांधवाः ॥ २४ ॥ एवमुक्त्वाततःपार्थोध्यायन्नास्तेमहामनाः ॥ चिरमंतर्मनाभूत्वाशोकोपहतचेतनः ॥ शोकार्तंतमथोज्ञात्वादुःखोपहतचेतसम् २५ अब्रवीत्तत्रगोविंदोहर्षयन्सर्वपांडवान् ॥ माशुचोभरतश्रेष्ठनत्वंशोचितुमर्हसि ॥ २६ ॥ यस्यतेभ्रातरःशूराःसर्वलोकेषुधन्विनः ॥ अहंचप्रियकृद्राजन्सात्यकिश्चमहायशाः ॥ २७ ॥ विराटद्रुपदौचेमौधृष्टद्युम्नश्चपार्षतः ॥ तथैवसबलाश्चेमेराजानोराजसत्तम ॥ २८ ॥ त्वत्प्रसादंप्रतीक्षंतेत्वद्भक्ताश्चविशांपते ॥ एषतेपार्षतोनित्यंहितकामःप्रियेरतः ॥ २९ ॥ सैनापत्यमनुप्राप्तोधृष्टद्युम्नोमहाबलः ॥ शिखंडीचमहाबाहोभीष्मस्यनिधनंकिल ॥ ३० ॥ एतच्छ्रुत्वाततोधर्मोधृष्टद्युम्नंमहारथम् ॥ अब्रवीत्समितौतस्यांवासुदेवस्यशृण्वतः ॥ ३१ ॥ धृष्टद्युम्ननिबोधेदंयत्त्वांवक्ष्यामिमारिष ॥ नातिक्रम्यंभवेत्तच्चवचनंममभाषितम् ॥ ३२ ॥ भवान्सेनापतिर्मह्यंवासुदेवेनसंमितः ॥ कार्तिकेयोयथानित्यंदेवानामभवत्पुरा ॥ ३३ ॥ तथात्वमपिपांडूनांसेनानीःपुरुषर्षभ ॥ सत्वंपुरुषशार्दूलविक्रम्यजहिकौरवान् ॥ ३४ ॥ अहंचतेनुयास्यामिभीमःकृष्णश्चमारिष ॥ माद्रीपुत्रौचसहितौद्रौपदेयाश्चदंशिताः ॥ ३५ ॥ येचान्येपृथिवीपालाःप्रधानाःपुरुषर्षभ ॥ ततउद्धर्षयन्सर्वान्धृष्टद्युम्नोभ्यभाषत ॥ ३६ ॥ अहंद्रोणांतकःपार्थविहितःशंभुनापुरा ॥ रणेभीष्मंकृपंद्रोणंतथाशल्यंजयद्रथम् ॥ ३७ ॥ सर्वानद्यरणेदृप्तान्प्रतियोत्स्यामिपार्थिव ॥ अथोत्कृष्टंमहेष्वासैःपांडवैर्युद्धदुर्मदैः ॥ ३८ ॥ समुद्यतेपार्थिवेंद्रेपार्षतेशत्रुसूदने ॥ तमब्रवीत्ततःपार्थःपार्षतंपृतनापतिम् ॥ ३९ ॥

॥ ३१ ॥ भाषितमुक्तं ॥ ३२ ॥ मह्यंमम ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ आकाशगइवपक्षीव ॥ ४४ ॥ रथचर्यासुरथवर्त्मसु ॥ ४५ ॥ परमोपेतःपराउत्कृष्टाचासौमालक्ष्मीश्चेतिपरमातयाउपेतः ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

व्यूहःक्रौंचारुणोनामसर्वशत्रुनिबर्हणः ॥ यंबृहस्पतिरिंद्रायतदादेवासुरेब्रवीत् ॥ ४० ॥ तंयथावत्प्रतिव्यूहंपरानीकविनाशनम् ॥ अदृष्टपूर्वंराजानःपश्यंतुकुरुभिःसह ॥ ४१ ॥ यथोक्तःसन्नृदेवेनविष्णुर्वज्रभृतायथा ॥ प्रभातेसर्वसैन्यानामग्रेचक्रेधनंजयम् ॥ ४२ ॥ आदित्यपथगःकेतुस्तस्याद्भुतमनोरमः ॥ शासनात्पुरुहूतस्यनिर्मितोविश्वकर्मणा ॥ ४३ ॥ इंद्रायुधसवर्णाभिःपताकाभिरलंकृतः ॥ आकाशगइवाकाशेगंधर्वनगरोपमः ॥ ४४ ॥ नृत्यमानइवाभातिरथचर्यासुमारिष ॥ तेनरत्नवतापार्थःसचगांडीवधन्वना ॥ ४५ ॥ बभूवपरमोपेतःसुमेरुरिवभानुना ॥ शिरोभूद्द्रुपदोराजामहत्यासेनयावृतः ॥ ४६ ॥ कुंतिभोजश्चचैद्यश्चचक्षुर्भ्यांतौजनेश्वरौ ॥ दाशार्णकाःप्रभद्राश्चदाशेरकगणैःसह ॥ ४७ ॥ अनूपकाःकिराताश्चग्रीवायांभरतर्षभ ॥ पटच्चरैश्चपौंड्रैश्चराजन्पौरवकैस्तथा ॥ ४८ ॥ निषादैःसहितश्चापिपृष्ठमासीद्युधिष्ठिरः ॥ पक्षौतुभीमसेनश्चधृष्टद्युम्नश्चपार्षतः ॥ ४९ ॥ द्रौपदेयाभिमन्युश्चसात्यकिश्चमहारथः ॥ पिशाचादारदाश्चैवपुंड्राःकुंडीविषैःसह ॥ ५० ॥ मारुताधेनुकाश्चैवतंगणाःपरतंगणाः ॥ बाह्लिकास्तित्तिराश्चैवचोलाःपांड्याश्चभारत ॥ ५१ ॥ एतेजनपदाराजन्दक्षिणंपक्षमाश्रिताः ॥ अग्निवेशास्तुहुंडाश्चमालवादानभारयः ॥ ५२ ॥ शबराउद्भसाश्चैववत्साश्चसहनाकुलैः ॥ नकुलःसहदेवश्चवामंपक्षंसमाश्रिताः ॥ ५३ ॥ रथानामयुतंपक्षौशिरस्तुनियुतंतथा ॥ पृष्ठमर्बुदमेवासीत्सहस्राणिचविंशतिः ॥ ५४ ॥ ग्रीवायांनियुतंचापिसहस्राणिचसप्ततिः ॥ पक्षकोटिप्रपक्षेषुपक्षांतेषुचवारणाः ॥ ५५ ॥ जग्मुःपरिवृताराजंश्चलंतइवपर्वताः ॥ जघनंपालयामासविराटःसहकेकयैः ॥ ५६ ॥ काशिराजश्चशैब्यश्चरथानामयुतैस्त्रिभिः ॥ एवमेनंमहाव्यूहंव्यूह्यभारतपांडवाः ॥ ५७ ॥ सूर्योदयंतइच्छंतःस्थितायुद्धायदंशिताः ॥ तेषामादित्यवर्णानिविमलानिमहांतिच ॥ श्वेतच्छत्राण्यशोभंतवारणेषुरथेषुच ॥ ५८ ॥ ॥ इतिश्रीमहाभारतेभीष्मपर्वणिभीष्मव० क्रौंचव्यूहनिर्माणेपंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥ ॥ छ ॥

॥ संजयउवाच ॥ ॥ क्रौंचंदृष्ट्वाततोव्यूहमभेद्यंतनयस्तव ॥ रक्षमाणंमहाघोरंपार्थेनामिततेजसा ॥ १ ॥ आचार्यमुपसंगम्यकृपंशल्यंचपार्थिव ॥ सौमदत्तिंविकर्णंचसोश्वत्थामानमेवच ॥ २ ॥ दुःशासनादीन्भ्रातॄंश्चसर्वानेवचभारत ॥ अन्यांश्चसुबहून्शूरान्युद्धायसमुपागतान् ॥ ३ ॥

॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ॥ इतिभीष्मपर्वणिनैलकंठीयेभारतभावदीपेपंचाशत्तमोऽध्यायः ५० ॥ ॥ छ ॥ ॥ छ ॥ ॥ क्रौंचमिति ॥ १ ॥ २ ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=07.08.20 15:46
,TRANSFERRED=2020/08/07 at 15:49:07
,PAGES=5
,TYPE=STD
,NAME=S0003446
,Book Name=M-617A-MAHABHARAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection